International Journal of Sanskrit Research 2019; 5(4): 324-329

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 324-329
© 2019 IJSR
www.anantaajournal.com
Received: 02-05-2019
Accepted: 05-06-2019

साधुः शुकमुनिदासः

शोधच्छात्रः, करनाटक-संस्कृत-विश्वविद्यालयः, बेंगळूरु, कर्नाटक, भारत

Correspondence
साधुः शुकमुनिदासः

शोधच्छात्रः, करनाटक-संस्कृत-विश्वविद्यालयः, बेंगळूरु, कर्नाटक, भारत

# हरिवाक्यसुधासिन्धौ वैराग्यस्वरूपविवेचनम्

**साधुः शुकमुनिदासः**

**सारांश**

तत्र भगवता श्रीस्वामिनारायणेन दुर्गपट्टण-सारङ्गपट्टण-श्रीनगरादिषु अनेकेषु स्थलेषु स्वीयभक्तानुग्रहार्थं मुहुर्मुहुः प्रवासाः कृताः। एतादृशप्रवाससन्दर्भेषु तत्तत्स्थलेषु भक्तानुग्रहार्थम्, तान् (भक्तान्) एकीकृत्य, तेषां मनस्सु विद्यमानानां भागवतधर्म-वेदान्ततत्त्वादिविषयकाणां सन्देहानां विषये प्रश्नान् कर्तुं श्रीस्वामिनारायण-भगवान् चोदयति स्म। ततः तैः पृष्टानां प्रश्नानामुत्तरदानव्याजेन वेद-वेदान्त-भगवद्गीता-स्मृतिपुराणादि-प्राचीनग्रन्थेषु, तदपेक्षयाऽर्वाचीनग्रन्थेष्वपि विद्यमानाः मुमुक्षुजनावश्यंवेद्याः शतशो विषयाः स्वामिनारायणभगवता सर्वजनसुग्राह्यतया प्रतिपादिताः। स्वामिनारायणभगवतः भगवदवताररूपत्वात् श्रीहरिः इत्येवापरं नाम। तादृश-स्वामिनारायणापरपर्यायस्य श्रीहरेः वाक्यानि सुधायन्ते = अमृतायन्ते, अमृतत्वापरपर्यायमोक्षप्राप्तिहेतुभूतत्वात्। एतादृशहरिवाक्यसुधायाः न बिन्दुः, न वा कासारः, स्वामिनारायणभगवता अवतारितः, किन्तु, अनेकमुक्तारत्नाख्यमहासिन्धुरेव तैरवतारितः, यस्य अतिगभीरत्वम्, अतिविस्तृतत्वं च सिन्धुरितिव्यपदेशेनैव सुष्ठु संवेद्यम्। अतः तादृशविशेषणविशिष्टः अतिसम्मान्योऽयं 'हरिवाक्यसुधासिन्धुः' इति सुगृहीतनामधेयः ग्रन्थविशेषः। अयं च ग्रन्थः श्रीस्वामिनारायणभगवत्साक्षाच्छिष्येण शतानन्दमुनिनाम्ना, तत्तद्विषयाणां भगवत्स्वामिनारायणकथनावसर एव यथायथं संगृहीतः, श्रीस्वामिनारायणभगवतः सुसम्मतः च सन्, तदीयपरम्परागतविद्वद्भिरनुसन्धेयतया निर्दिष्टः। अन्वर्थतया समुद्रायमाणेऽस्मिन्ग्रन्थे सन्ति नैके वेदान्ततत्त्व-भक्तितत्त्व-ज्ञानतत्त्व-मोक्षतत्त्वादिविषयकाः अंशाः। एतेषु इतरसर्वविषयापेक्षया भागवतधर्मविषये विशेषतः प्रतिपादनं साङ्गोपाङ्गतया कृतं दरीदृश्यते। **प्रकृते लेखे अस्मिन् ग्रन्थे प्रतिपादितवैराग्यस्वरूपमधिकृत्य विचारः क्रियते।**

**कू टशब :** साधनम्, ब्रह्म, **वैराग्यम्** , जीवः, मोक्षः, भक्तिः इत्यादयः

## प्रस्तावना

मानवजीवनस्य सार्थक्यसाधनाय ब्रह्मज्ञानमपेक्षते। तत्प्राप्तुं मार्गदर्शनाय कश्चन योग्यगुरो आवश्यकताभवति। गुरोः उपदेशं संप्राप्य तेन निदिष्टमार्गेण भगवन्तं प्रति भक्तिं कुर्यात् जीवः इति तत्र एकः क्रमः। अयमेव'उपासना' इति नाम्ना शास्त्रेषु निर्दिष्टमस्ति।

अर्थात्‘उपासना परमात्मप्राप्त्यर्थं क्रियमाणः कश्चन साधनविशेषः’। सा च उपासनास्थूलस्तरे द्विविधा। व्यक्तोपासना, अव्यक्तोपासना चेति । व्यक्तविषयमाधारीकृत्य(इन्द्रियगोचारं व्यक्तं) क्रियमाणा उपासना व्यक्तोपासना। इन्द्रियेभ्यो अगोचरस्य परब्रह्मणः निर्गुणसत्वगुणोपासनाअव्यक्तोपासना इत्यभिधीयते । व्यक्तोपासना, अव्यक्तोपासनापेक्षया सुलभा सद्यः फलदायकी च।। गुरोः उपदेशं विना साधकस्य उपासना अकर्णधारा नौकाइवगम्यस्थानप्राप्तौ असमर्था भवति । गुरुः दीक्षा द्वारा शिष्यबुद्धौ स्वशक्तिंनिक्षिपति। तयादीक्षाशक्त्या अथवा आचार्यानुग्रहबलात् एव साधकस्य उपासना सफला भवति। उपासनायाः मुख्यं वैराग्यमिति वैराग्यस्वरूपविचारः अस्मिन् निबन्धे क्रियते।

**विरागः – निर्वचनम्**

विरागस्य भावःष्यञ,‘वैराग्य’ शब्दस्य व्युत्पत्तिः ।

अप्राप्तेवस्तुनिअभिलाषःतृष्णा।

पाप्तेवस्तुनिअभिलाषःसङ्गः। आभ्यांद्वाभ्यांसंयुक्तनामएव

“रागः” इत्यभिधीयते।

भगवद्गीतायाम् अर्जुनेन अयं प्रश्नः कृतः

अर्जुन उवाच

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम्।। [1]

हे कृष्ण, कर्मविषये त्यागः, कर्मयोगस्य च युगपत् प्रशंसा कृता भवता। तयोर्मध्ये कः श्रेष्ठः इतिसप्ष्तया उच्यताम् ।अस्य प्रश्नस्य समाधानमेवमुक्तं भगवता ..

श्री भगवानुवाच

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते।। [2]
ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते।। [3]

मनुष्यस्य कल्याणाय सन्यासः कर्मयोगः उभावपि यद्यपि श्रेष्टतमौ तथापि सन्यासापेक्षया कर्मसन्यासयोग एव परमश्रेष्ठः ।यो मनुष्यः सुख-दुःख, पुण्य-पाप, द्वेष-काङ्क्षादि द्वन्द्वेभ्योमुक्तोभवति स एव संसारबन्धनेभ्योविनिर्मुक्तो भवति।

एवं भगवता स्वयं प्रतिपादितमिदमुपायं यत् लौकिक विषयेषु विरक्तिः परमपदप्राप्त्यर्थं न्यस्तव्यं अति मुख्यसोपानमिति।

**रागप्राप्तिः**

“इदं मम” इति मनुष्यस्य नैसर्गिकी काचित् भावना जननादेव आरभ्यते । यथा नरः वर्धितो भवति तदा इयं च भावना कार्यरूपमवाप्तुमारभते। जीवने बुभुक्षादि प्राथमिकावश्यकताभ्यो धन-कनक-वस्तु-वाहन-राज्य-वनितादि-विषयाणाम् इच्छा मनुष्यं नितरां बाधते। तान् प्राप्तुं वा, प्राप्तस्य रक्षणाय वा यतते नरः। इयं भावना न केवलं अचेतनं वस्तु प्रति, अपि तु स्वजनान् अपि एवमेव अन्वेति। कदाचित् अत्र अवशात् लुप्तप्रज्ञोऽपि जायेत । ततः धर्मभ्रष्टस्सन्संपूर्णतया नष्टजीवनः भवति मनुष्यः। एतादृशनरस्य अत्युत्तममुदाहरणं महाभारते पुत्रप्रेम नाम रागेन पीडितः दृतराष्ट्रः। तेन पुत्रवात्सल्येनैव सन केवलं तस्य पुत्रपौत्रादि परिवारस्य अपि तु युद्धे अनेकानां सैनिकानां मरणस्य कारणमभूत्। लोकेयत्रप्राप्तमात्रेण विषयाः पूरिताः भवन्ति तत्र तृष्णा एका एव यावत् पूर्यते तावत् अथवा ततोप्यधिकं वर्धते। मनुष्यस्य आयुः सीमितः । जातस्य हि ध्रुवो मृत्युःइत्युक्त रीत्यायो जायते स अवश्यं मृयते एव।

आधिव्याधिश्तैर्जनस्य विविधैरारोग्नामुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विव्रुतद्वारा इव व्यापदः।
जातं जातमवशमाशु विवशं मृत्युः करोत्यात्मसात्
तत्किं तेन निरङ्कुशेन विधिना यन्निर्मितं सुस्थिरम्।। [4]

प्रपञ्चेऽपिसुस्थिरमिति किमपि नास्ति। सर्वे नश्यन्त्येव कदाचित्। तथापि चित्रं नाम नरः एकस्य अनन्तरम् अन्यविषयं प्रति मनः प्रधावति। अत एव वैराग्यशतके भर्तृहरिणा तृष्णायाः स्थितिः एवं वर्णिता ...

वलीभिर्मुखमाखमाक्रान्तं पलितेनाङ्कितंशिरः।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते ॥ [5]
निवृत्ता भोगेच्छा पुरुषबहुमानोऽपि गलितः
समानाः स्वर्याताः सपदि सुहृदो जीवितसमाः।
शनैर्यष्ठ्युत्थानंघनतिमिररुद्दे च नयने
अहो मूढः कायस्यदपि मरणापायचाकितः।। [6]

गच्छता कालेन मनुष्यशरीरं नाशस्य संकेताःप्रदास्यति। तदनुगुणतयाअङ्गविकाराःजायन्ते। परन्तुमनुष्यतृष्णायाः तद्विपरीतगतिरेव । एवं यथा आयुः वर्धते तथा तृष्णा इतोऽपि तीव्रतरा भवति इत्यर्थः ।

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं
व्यापारैर्बहुकार्यभारगुरुभिः कालोऽपि न ज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्चा नोत्पद्यते
पीत्वा मोहमहीम् प्रमादमदिरामुन्मत्तभूतं जागत्।। [7]

ऐहिक विषयेषु इच्छाकारणेनआजीवनंकस्यचित् विषयप्राप्त्यर्थं निरन्तरं अहर्निशं प्रयतमाणो भवति । अस्मिन्नेव यत्न कालः कथमतीतः इति लक्षितुमपि न शक्नोति । जीवनान्तेयदा शरीर-बुद्धि-इन्द्रियादि उपकरणानाम् अवसानदशायामपि इयं च आशा न परित्यक्ता भवति ।

**रागस्य प्राबल्यम्**

जगति कार्याणि उद्यमेन सिद्ध्यन्ति । तत्रबुद्धिशक्तेर्वा शरीरबलस्य वा द्वयोः अपि वा प्रयोगः अनिवार्यो भवति । परन्तु उद्यमात् पूर्वं कश्चन अभिलाषः एव तत्र प्रेरको भवति । तेन कारणेन कथश्चित अभीष्टं प्राप्तव्यमिति धिया यदा प्रवर्तते मनुष्यः, कदाचित् उद्दिष्यफलप्राप्त्यर्थं यत्किमपि कार्त्यं (कृत्यं वा अकृत्यं वा दुष्कृत्यं वा सर्वमपि कर्तुं )सिद्धं भवति नरः । तादृश उन्मत्तचित्तस्थितेः कारणं मनोरथस्य प्राबल्यमेव । तादृशी कामनायः विवरणमेवं कृतं वैराग्यशतककारेण भर्तृहरिणा...

खलालापाः सोढाः कथमपि तदाराधनपरैः
निग्रुःयान्तर्बाष्पं हसितमपि शून्येन मनसा ।
कृतोवित्तस्तंभप्रतितधियामञ्जलिरापि
त्वमाशे मोघासे किमपरमतो माम्।। [8]
अमीषां प्राणानां तुलितबिसिनीपत्रपयसां
कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम्
यदाढ्यनामग्रे द्रविनमदिनिःसंज्ञामनसां
कृतं वीतव्रीदैर्निजगुणकथापातकमपि ।। [9]

एवंइच्छाशक्तिः बुद्धिम् एवं प्रचोदयति येन कदाचित् दुष्करकार्यमपिसाधितुंप्रयतते मनुष्यः । किञ्च तादृश क्रियायाः अथवा आशाया उद्देश्यः धर्मबद्धो न स्यात् तर्हि तस्य प्रतिफलं न केवलं तस्याः व्यक्तेः अपि तु परिवारं, समाजं, राष्ट्रंचबाधयेत्। अत्र रामायणकथायां कैकेय्याःपात्रः समुचितमुदाहरणं भवति । तस्याः पुत्रः भारत एव राजा भवेदिति आकाङ्क्षायांतया"विवासनं च रामस्य भरतस्याभिषेचनम्" [10] इति यद्वाञ्छितंतेन न केवलं दशरथः, रामः, सीता, कौशल्या इत्यादि राजपरिवारे विद्यमानाः जनाःअपि तु तेषां राज्ये विद्यमानाः प्रजाः अपि दुःखिताः सञ्जाताः ।भागवते तावत् देवक्याः गर्भे जायमानः अष्टमः सन्तानः मातुलं कंसं हनिष्यति इति अशरीर्या श्रुतं कंसेन । भगिन्याः विवाहे अत्यन्त उत्साहेन सर्वं निर्वहतः तस्य बुद्धिः क्षनाभ्यान्तरेपरिवर्तिता जाता। झटितितेन नवोढायःभगिन्याः, तस्य पतेः च बन्धनं कृत्वा कारागारे स्थापयित्वा तयोः शोषणं कृतम्। एतावदेव न! तदनन्तरंभगिन्याः नवजातानां सप्तानां शिशूणां क्रमेणअतिक्रूरतया संहारो कृतः कंसेन। देवक्या अष्टमशिशोः परिवर्तनं जातं, स शिशुः गोकुले क्वचित् वर्धमानोऽस्ति इति च ज्ञात्वा तत्रस्थानां सर्वाणां नवजातशिशूणां संहारः कर्तव्यः इति आदिष्टवानिति। एवम्तृष्णावशात् रागेण कदाचित् विवेकी अपि कश्चन पुरुषः उन्मत्तः सन्यत्किमपि अकार्यं /दुष्कार्यं कर्तुं प्रभवति ।

**४रागस्य दुष्परिणामाः**

कार्यसाधने मनोरथः सहकरोति यद्यपि, तस्यमनोरथस्यतीव्रता

कदाचित् विपरीतपरिणामान् जनयति । भागवतकथायां राजा जदभरतस्य कथा सुप्रसिद्धा । राजा भरतः न सामान्यः कश्चन मनुष्यः। दुष्यन्त-शकुन्तलयोःपुत्रःस बाल्ये वयसि एव सिंह-व्याघ्रादि वन्यप्रानिस्सह खेलति स्म । अस्त्र-शस्त्रप्रयोगेषु पारङ्गतः स पराक्रमेणस्वराज्यं सुविशालमकरोत्। तस्य राज्यस्य नाम 'अञ्जनभवर्ष' इति यो आधुनिक काले 'भारतवर्ष' इति तस्यैव नाम जातमस्ति ।तस्य पत्नी विश्वरूपस्य पत्नी पाञ्चजनी । तस्य पञ्च पुत्राः सुमतिः, राष्ट्रभूतः, सुदर्शनः, आवरणः, धूम्रकेतुः। गृहस्थाश्रमेनिर्वहमाणानि सर्वाण्यपि कार्याणि परिसमाप्य, पुत्रेषु राज्यभारं निक्षिप्य वानप्रस्थाश्रमं प्रति प्रस्थितः । क्रमेण स सन्यासी भूत्वा वनं प्रविश्य आत्मज्ञान साक्षात्कार सिद्ध्यर्थं घोर तपमाचारन् आस्त । कालान्तरेतस्य तपः तीव्रतरं जातम् येन तस्पस्यायांतेन उत्कृष्टप्रगतिःप्राप्ता आसीत् । अथैकदा, यदा स चक्र-नदीतीरे ध्यानमग्नः आसीत्, तदा एका गर्भिणी मृगः नद्यां नदेः जलं पातुं तत्रागता आसीत् । तस्मात् अनतिदूरे तदानीमेवसिंहगर्जनं श्रुतम्। तेन भयाक्रन्तः मृगः इतस्ततः अधावत् । तेन तस्य प्रसवो जातः । सिंहभयात् ततः पालयितुं यतमाणा सा नदीतीरे विद्यमानं अचलमेकं संघट्य तत्रैव मृता । नदीप्रवाहे स शावकः नीतः । करुणया भरतः तं अनाथं, असहायकं तं शावकं रक्षितावान् । तं तीरं प्रापय्य, यावत् स शावकः स्वावलम्बी भवेत् तावत्पर्यन्तं स्वरक्षणे एव तं स्थापयामि इति विचिन्त्य तं तस्य कुटीरं प्रति नीतवान् । ततः प्रतिदिनं अन्यप्रानिभ्यो दुग्धसञ्चयानं कृत्वा तं मृगशावकं भोजयति स्म । अत्यन्त स्वादिष्ट तरुणानां चयनं कृत्वा तम् अतिजागरूकतया पोषयति स्म । स शावकोऽपि भरतं माता इति भावयन्, स्वचेष्टैः तं तोषयति स्म । अनेनभरतःसर्वदा तस्यैव पालनपोषनादि विषये चिन्तयन् ध्यानादि तस्य दिनचारीं परित्यक्तवान्। यथांकथञ्चित यदि स ध्याने उपविष्यति चेदपि स शावकः तस्य उत्सङ्गे क्रीदितुमागच्छति स्म । तेन तस्य तपः नानुवर्तते स्म । एवं तस्य तपः सर्वदा भङ्गं भवति स्म । एवं यो राजा जीवने राज्य-परिवार-सुख-सौख्यादि सर्वविध भोगान् तुणाय मत्वा अरण्यमागत्यतपमाचारन्नासीत्, स एव अधुना एकस्य मृगशावकस्य प्रीतौ बद्धः सन्स्वमार्गात् भ्रष्टः । एकस्मिन्दिने स मृगः आश्रमात् गतः, न पुनरागतः । मृगस्य चिन्ता भरतमतीव बाधते स्म । मरणकालेऽपि मृगस्य चिन्ता एव तमबाधत । एवं भरतः मृगोपरिरागकारणादेव अनन्तरजन्मनि स्वयंभरतःमृगो सञ्जातः । तावत्पर्यन्तं यत् तपः कृतः तत्सर्वं नष्टं जातम्।

तृष्णा मनुष्यं किं किं कारयति इत्यस्य विवरणं एवं दत्तमस्ति वैराग्यशतके ..

भ्रान्तं देशमनेकदुर्गविषमं प्राप्तं न किन्चित्फलम्
त्यक्त्वा जातिकुलाभिमानमुचितं सेवा कृता निष्फला
भुक्तं मानविवर्जितं परगृहेश्वाशङ्काया काकवत्
तुष्णे जुम्भसि पापकर्मपिशुने नाद्यापि सन्तुष्यसि ।। [11]

सत्कार्येणपुण्यं दुष्कर्मणा पापञ्च भविष्यति इति यद्यपि सिद्धं, धर्मादिना पुण्यसंचायनमपिमोक्षप्राप्तिमार्गे बाधां जनयति । एवं यस्य कर्मणः प्रतिफलमपेक्षते तं प्रति नरः बद्धो भवति । इदञ्च बन्धनं तस्य लक्ष्यसाधने प्रदिबन्धकं भवति । एवं हि रागस्य प्रतिफलं कीदृशं भवतीति इत्थं वर्णितम्।

न संसारोत्पन्नं चरितमनुपश्यामि कुशलं
विपाकः पुण्यानां जनयति भयं दे विमृषतः
महद्भिः पुण्यौघैश्चिरपरिग्रुहीताश्च विषया
महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम्।। [12]

वैराग्यशतककारःतृष्णामुद्दिश्य एवं वदति यत् " जन्मनः अनन्तरं जन्म इति प्रतिजन्मनि मम कर्मणः सत्फलं नानुपश्यामि। सत्कर्मणा पुनः सुखभोगस्य प्राप्तिर्भवति । तामनुभोक्तुं पुनः जनिष्यामि । एवंअनन्ततयाकर्म, तदनन्तरं तस्य फलंपुनः जन्म इति अस्य नैरन्तर्यं अविच्छिन्नम्। एतस्य खण्डनं तदानेमेव संभवति यदा रागप्रभावत् मुक्तिः प्राप्स्यते"।

**वैराग्यस्य फलम्**

विषयत्यागेनदुष्कर्मणि मनः न उपक्रमते। अपि च क्रियमाणानां कर्माणां फलानि जीवं न स्पृशन्ति। अस्यां स्थित्यां भगवदुपासनायां मनः सुष्ठु संलग्नो भवितुमर्हति। वैराग्यसहितभगवदुपासनामोक्षमार्गं सुगमं करोति । एवं एकया रीत्या विषयेषु विरागः भगवत्परमपद प्राप्त्यर्थं प्रथमं सोपानमिति वक्तुं शक्यते। रागस्य कीदृशं फलं भवतीति विवृणोति अयं श्लोकः। तुङ्गं वेश्म सुताः सतामभिमताः संख्याभिमताः संख्यातिगाः सम्पदः

कल्याणी दयिता वयश्च नावमित्याज्ञानमूढो जनः
मत्वा विश्वमनश्वरं निविशते संसारकारागृहे
संदृश्य क्षणभंगुरंतदखिलं धन्यस्तु संन्यस्यति।। [13]

उन्नतप्रासादेषु वसन्तः, पण्डितानां मुखात् स्व अपत्यानां प्रशंसां श्रुत्वा, युवभार्याभिस्सह जीवन्तः अज्ञानिनः इदमेव जीवनं रम्यं रमनीयञ्च इति मन्यमानाः पौनः पुनेन जीवन्मरण वलये परिभ्रमन्ति । किञ्च, एतादृश क्षणिकसुखान्विरागेन परित्यज्य यो सन्यस्यति स धन्यः।इहिक भोगानां परित्यातेन कीदृशं शुखं लभेत इति शङ्कां भवेत्। संयसिनः जीवने किं सुखमिति विवृणोति अधोनिर्दिष्टसुभाषितद्वयम्।

फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरिताम्
मृदुस्पर्शाशय्या सुललितलतापल्लवमयी
सहन्ते संतापं तदपि धनिनां द्वारि कृपणाः।। [14]

यत्र (वने) सुमधुराणिफलानिप्रभूतं लभन्ते, यत्र स्वच्छोदकंपावननदीषु सर्वदा उपलभ्यन्ते, यत्र च सद्यः पल्लवित सुगन्धभरितानि पुष्पाण्येव शय्या भवितुमर्हतितादृशं सुखं परित्यज्य कृपणाः एव धनकनकादि भोगानां पृष्ठत अनुधावन्तः धनिकानां द्वारे तिष्ठन्ति।

यदेतत्स्वच्छन्दं विहरणमकार्पण्यमशनं
सहार्यैःसंवासः श्रुतमुपशमैकव्रतफलम्
मनो मन्दस्पन्दं बहिरपि चिरस्यापि विमृशन्
न जाने कस्यैष परिणतिरूदारस्य तपसः ।। [15]

वनेषु स्वेच्छाटनेन, प्राकृतिक आहार स्वीकारेण(कन्दमूलादीनां भोजनेन), ऋषि-मुनीनांसांगत्येन, तेषां वेदज्ञानसारोपदेशेन च मन शान्तिंप्राप्नोति । लौकिक जीवने अतिकठिनप्रयासेनापिया मनःशान्ति न सिध्यति सा एव उत्कृष्टतपसाएतादृश वैराग्य जीवनेन सुलभा भवतीति सुभाषितकारः स्वविस्मयं प्रकटीकरोति । किमधिकम्? वैराग्येण परमात्मज्ञान प्राप्तिरापि सिध्यतेति उद्घोषन्ति।

मनुष्यस्य अन्तिमलक्ष्यस्य क्रमः एवं वर्णितः विवेकचूडामणी ग्रन्थे .

मोक्षस्य हेतुः प्रथमो निगद्यते
वैराग्यमत्यन्तमनित्यवस्तुषु।
ततः शमश्चापि दमस्तितिक्षा न्यासः प्रसक्ताखिलकर्मणां भृशम्॥ [16]

मोक्षप्राप्त्यैप्रथमं सोपानम् अनित्य वस्तुषुः विरागः। ततः परम् शमदमादि गुणानामवलंबनम्। सर्वाणां कर्माणां संपूर्ण परित्यागैव मोक्षं साधयति इत्यर्थः ।

ततः श्रुतिस्तन्मननं सतत्त्वध्यानं चिरं चित्यनिरन्तरं मुनेः।
ततोऽविकल्पं परमेत्य विद्वानिहैव निर्वाणसुखं समृच्छति॥ [17]

तत्पश्चात्तीर्थकरेभ्यो / ऋषिमुनिभ्यो आत्मतत्वज्ञान प्राप्तिः, दीर्घकालं यावत् नैरन्तर्येण आत्मतत्वस्यध्यानंइत्यादिनाजीवः परमनिर्विकल्पावस्थां प्राप्य निर्वाणसुखमाप्नोति।
वैराग्यस्य फलविषयेजगदाचार्यैः शङ्कराचार्यैरेव सुस्पष्टमेवमुक्तम्.

वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम्।
स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम् ॥ [18]

वैग्यस्य फलं ज्ञानम् । ज्ञानस्य फलं इन्द्रियनिग्रहः, तस्य फलं आनन्दः ततः शान्तिं च प्राप्नोति जीवः इत्यर्थः ।

## उपसंहारः

आध्यात्मज्ञानप्राप्त्यै (यं ज्ञानं प्राप्त वयं आत्मानम् अपि च तस्य कर्तारं जानीमः) या कृषिः आवश्यकी तां कर्तुं मनः सर्वदाविमुखं भवति । तत्र इन्द्रियचापल्यं, रागकारणात्काम-क्रोधादि मनो भावाः प्रमुखकारणानि। अतः तेषां परित्याः प्रथमतया कर्तव्यम्। ततः परं ध्यानादिना, भगवदुपासना कर्तव्या । "एवमकुंठित विश्वासेन, ध्यानादिना, परमभक्त्या, भगवद्विषयानुसन्धानादि प्रार्थनाविशेषैःमुकुन्दं प्रार्थयति तर्हि तस्य परमपुरुषस्य अनुग्रहेण पुनरावृत्तरहित स्थितिं प्राप्तुमर्हति अयं जीवः" इति शास्त्राणि उद्घोषयन्ति ।

## सन्दर्भ सूची


1. भगवद्गीता ५.१
2. भगवद्गीता ५.२
3. भगवद्गीता ५.३
4. वैराग्यशतकम् – ३३
5. वैराग्यशतकम्८
6. वैराग्यशतकम्२०
7. वैराग्यशतकम्४३
8. वैराग्यशतकम् – ४
9. वैराग्यशतकम् – ५
10. वाल्मीकि रामायणम् – १.१.२२
11. वैराग्यशतकम् – २
12. वैराग्यशतकम् – १४
13. वैराग्यशतकम् – २०
14. वैराग्यशतकम् – २७
15. वैराग्यशतकम् – ८२
16. विवेकचूडामणी – ८१
17. विवेकचूडामणी – ८२
18. विवेकचूडामणी – ४२०